ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।

छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥ १५.१ ॥

ūrdhvamūlamadhaḥśākhamaśvatthaṁ prāhuravyayam |
chandāṁsi yasya parṇāni yastaṁ veda sa vedavit || 15.1||

अधश्चोर्ध्वं प्रसृतास्तस्य शाखा

गुणप्रवृद्धा विषयप्रवालाः ।

अधश्च मूलान्यनुसंततानि

कर्मानुबन्धीनि मनुष्यलोके ॥ १५.२ ॥

adhaścordhvaṁ prasṛtāstasya śākhā
guṇapravṛddhā viṣayapravālāḥ |
adhaśca mūlānyanusantatāni
karmānubandhīni manuṣyaloke || 15.2||

न रूपमस्येह तथोपलभ्यते

नान्तो न चादिर्न च संप्रतिष्ठा ।

अश्वत्थमेनं सुविरूढमूलं

असङ्गशस्त्रेण दृढेन छित्त्वा ॥ १५.३ ॥

na rūpamasyeha tathopalabhyate
nānto na cādirna ca sampratiṣṭhā |
aśvatthamenaṁ suvirūḍhamūlaṁ
asaṅgaśastreṇa dṛḍhena chittvā || 15.3||

ततः पदं तत्परिमार्गितव्यं

यस्मिन्गता न निवर्तन्ति भूयः ।

तमेव चाद्यं पुरुषं प्रपद्ये ।

यतः प्रवृत्तिः प्रसृता पुराणी ॥ १५.४ ॥

tataḥ padaṁ tatparimārgitavyaṁ
yasmingatā na nivartanti bhūyaḥ |
tameva cādyaṁ puruṣaṁ prapadye |
yataḥ pravṛttiḥ prasṛtā purāṇī || 15.4||